International Journal of Sanskrit Research 2022; 8(3): 56-58

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(3): 56-58
© 2022 IJSR
www.anantaajournal.com
Received: 08-02-2022
Accepted: 15-04-2022

**Mom Roy Chowdhury**
Assistant Professor, Department of Sanskrit, Krishnagar Govt College Krishnagar, Nadia, Maharashtra, India

**Corresponding Author:**
**Mom Roy Chowdhury**
Assistant Professor, Department of Sanskrit, Krishnagar Govt College Krishnagar, Nadia, Maharashtra, India

# आर्यानार्ययोः गोष्ठीविवादः

## Mom Roy Chowdhury

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i3b.1732

**सारसंक्षेपः**
विश्वसाहित्येषु प्रथमा देवस्तुतिप्रधाना आर्यैः विरचिता ऋग्वेदसंहिता । तत्र इन्द्रानलार्कवरुणसोमादीनां देवानां स्तुतिः क्रियते ऋषिभिः। तेषामेव देवानामुपासना सम्पादिता धनलाभाय अनार्यनिषूदनाय च। अनार्यान् पराभूय तेषां सर्वस्वलुण्ठनं हि आर्याणां मनोरथमासीत्। अतः आर्यानार्यविरोधस्तु सर्वथासीद् धनकेन्द्रिकः। वेदव्रतविरोधिनः अनार्याः ऋग्वेदसंहितायां ‘दस्युः’, ‘दासो’ वेति नामान्तरेणाभिधीयते। अनार्याः किल अन्यव्रता: इत्यपि जल्पिताः मन्त्रान्तरेषु। ऋग्वेदस्य पञ्चममण्डले मन्त्रविशेषे ‘अब्रह्मता’ इति पदान्तरेणापि प्रकटितानार्याणां देवहीनता। ऋग्वेदे न केवलम् आर्यानार्ययोः गोष्ठीविवादो विद्यते, आर्यगोष्ठीप्रधानैः सह दुष्टदासानां मिथः चण्डविवादोऽपि वर्ण्यते मन्त्रै: । ऋग्वेदे आर्यवर्गनायकप्रमुखानामुल्लेखो दृश्यते। अनार्यगोष्ठीप्रधानैः सह तेषां चिरविरोधः आसीत् । ऋग्वेदस्य सूक्तेषु बहूनामेव दस्यूनां दुष्टानां वृत्तान्तो दृश्यते। सर्वे ते सर्वदा शक्रदेवस्य तथा तस्य भक्तानाञ्च चिरविरोधिन: आसन्। आर्यप्रधानेषु सर्वे इन्द्रस्य भक्रप्रवरा: सोमाभिषवपरायणाः आसन्। तेषां परिपन्थिनः सर्वे क्रुरा: पिशाचतुल्याः दस्यवः इन्द्रेणैव विनष्टाः आहवेषु। आर्यप्रधानै: सह अनार्यै: संग्रामे अनुकम्पाशीलः करुणार्द्र: शक्रदेवः आर्यनायकस्य सुसहायकः आसीत्।

**कूटशब्दः** वृत्रासुरः नैसर्गिकः दानवः, नमुचिः -- वृत्रसहायकः दानवापरः, शिष्णुः -- वृत्रसहायकः नैसर्गिकः दानवः, ऋजिश्वान् -- इन्द्रोपासकः आर्यः, दभीतिः - इन्द्रोपासकः आर्यः

## प्रस्तावना
विश्वसाहित्येषु प्रथमा देवस्तुतिप्रधाना आर्यैः विरचिता ऋग्वेदसंहिता। तत्र इन्द्रानलार्कवरुणसोमादीनां देवानां स्तुतिः क्रियते ऋषिभिः। तेषामेव देवानामुपासना सम्पादिता धनलाभाय अनार्यनिषूदनाय च। अनार्यान् पराभूय तेषां सर्वस्वलुण्ठनं हि आर्याणां मनोरथमासीत्। अतः आर्यानार्यविरोधस्तु सर्वथासीद् धनकेन्द्रिकः। वेदव्रतविरोधिनः अनार्याः ऋग्वेदसंहितायां ‘दस्युः’, ‘दासो’ वेति नामान्तरेणाभिधीयते। उक्तं पदद्वयं ‘दस्’ इति धातुजातमेव। उपक्षयार्थकाद् ‘दस्’ इति धातोः सञ्जायते दस्युरिति पदम्। ये खलु अनार्याः रिपुवद् उपद्रवस्वरूपाः ते दस्यव: इति निन्दिता: आर्यैः। दस्युरिति पदं तावत् रिपुवाचकम्। उच्यते यत् - ‘रिपौ वैरिसपत्नाऽरिद्विषद्वेषणदुहृदः। द्विडविपक्षआहिताऽमित्रदस्युशात्रवशत्रवः अभिघातिपराऽरातिप्रत्यर्थिपरिपन्थिन:’ इति। रिपुपर्यायेषु पदेषु दस्युशब्दस्य प्रयोगमवेक्ष्य प्रतीयते यत् आर्यानार्ययोः विरोधः अहिनकुलविरोधतुल्यः शाश्वतिकः आसीत्। अनार्यवर्गः कृष्णवर्ण: अतिक्षुद्रनासिकायुक्तः जाड्यवक्रः इत्यादिभिः विविधैः गर्हितैः पदैः निन्दितः मन्त्रेषु आर्यैः । आर्यानार्ययोः वर्णवैषम्यं तथावयवगतवैषम्यं चाविद्यताम्। आर्याः सदैवानार्याणां हानिं चिन्तयन्ति स्म।

अनार्याः सर्वे घोरवर्णाः आसन्। अपरतः आर्याः सर्वे शुभ्रवर्णाः अतिशुभ्रवर्णाश्चेति वर्ण्यते मन्त्रैः। प्रस्तावेऽस्मिन् तृतीयमण्डलस्य चत्वारिंशत्तमस्य सूक्तस्य पञ्चमतममन्त्रः उल्लेखयोग्यः। तत्र ‘इमा जरित्रे प्रेमं वर्णमतिरच्छुभ्रमासाम’ इति मन्त्रांशेन शुभ्रवर्णानामार्याणाम् उन्नतिकल्पाय आहूतः इन्द्रदेवः।

‘आर्यः’ इति पदस्य व्युत्पत्तिमालोच्य प्रतीयते आर्यजनस्य श्रेष्ठत्वम्। सत्कुलोद्भवः पूज्यः श्रेष्ठो जनो हि आर्यः।ऋग्वेदसंहितायाः मन्त्रान् पर्यालोच्य प्रतीयते यत् अनार्याःसर्वे खलु वेदव्रतविरोधिनःआसन् । प्रायशस्ते अव्रताः इति निन्दिताः वेदव्रतपालकैः आर्यैः। अनार्याः किल अन्यव्रता: इत्यपि जल्पिताः मन्त्रान्तरेषु। अनुमीयते यत् वेदव्रतविरोधिनां व्रतानां पालनकारिणः एव अनार्याः न किल वेदानुसारिणः। ऋग्वेदस्य पञ्चममण्डले मन्त्रविशेषे ‘अब्रह्मता’ इति पदान्तरेणापि प्रकटितानार्याणां देवहीनता। अग्निहोत्रादिकर्महीनान् दस्यून् हत्वा आर्यहितसाधनमेव प्रार्थितं नित्यं सोमाभिषवपरायणै: आर्यैः। प्रायशः अनार्याः दासा: दस्यवो वा बाहुल्येन निन्दिताः ‘अकर्मा’, ‘अमन्तुः’, ‘अन्यव्रतः’ इत्यादिभिरभिधाभिः ।

ऋग्वेदे न केवलम् आर्यानार्ययोः गोष्ठीविवादो विद्यते, आर्यगोष्ठीप्रधानैः सह दुष्टदासानां मिथः चण्डविवादोऽपि वर्ण्यते मन्त्रै: । ऋग्वेदे आर्यवर्गनायकप्रमुखानामुल्लेखो दृश्यते। अनार्यगोष्ठीप्रधानैः सह तेषां चिरविरोधः आसीत् । ऋग्वेदस्य सूक्तेषु बहूनामेव दस्यूनां दुष्टानां वृत्तान्तो दृश्यते। सर्वे ते सर्वदा शक्रदेवस्य तथा तस्य भक्तानाञ्च चिरविरोधिन: आसन्। आर्यप्रधानेषु सर्वे इन्द्रस्य भक्रप्रवरा: सोमाभिषवपरायणाः आसन्। तेषां परिपन्थिनः सर्वे क्रुरा: पिशाचतुल्याः दस्यवः इन्द्रेणैव विनष्टाः आहवेषु। आर्यप्रधानै: सह अनार्यै: संग्रामे अनुकम्पाशीलः करुणार्द्र: शक्रदेवः आर्यनायकस्य सुसहायकः आसीत्।

प्रस्तावेऽस्मिन् ऋजिश्वान् नाम आर्यशूरेण सह पिप्रुः नामानार्यस्य संग्रामः तथा कुत्सो नाम राजर्षिणा सह शुष्णः इत्यनार्यप्रधानस्य रणोऽतिघोरः उल्लेखनीयः। दिवोदासो नाम आर्यमुखेन सह शम्बर इति अनार्यमुखस्य युद्धवृत्तोऽपि वैशद्येन वर्णितः बुधैः। सर्वे ते आर्यप्रधानाः इन्द्रोपासकाः आसन्। पिप्रुशुष्णशम्बरादीनां दस्युनाम् आशुविनाशाय आर्यमुखाः सर्वे पुनः पुनः इन्द्राय सोमाभिषवं कुर्वन्ति स्म। ऋग्वेदस्य प्रथममण्डलस्य द्वात्रिंशदधिकशततमस्य सूक्तस्य चतुर्थमन्त्रः शक्रस्तववाचकः। तत्र कृपालुना शक्रेण अङ्गिरामुनेः हितविधानार्थं जलदेभ्यो वारिवर्षणं तथा दस्युभ्यो गोधनमोचनञ्च कृतम्। इन्द्रस्य भक्तप्रवरेण दिवोदासापत्येन परुच्छेपेन नाम मुनिवरेण कृपानुरूपा याचिता मन्त्रविशेषान्तरेण। परुच्छेपकृतस्य सोमाभिषवस्य विघ्नकारिणः एवाव्रताः अनार्याः दस्यवो वा इत्यनेनाभिधीयते।

षष्ठमण्डलस्य चतुर्दशतमसूक्तं तावत् अग्निदेवशंसात्मकम्। तत्रानलदेवो भूयः पूजितः दस्युनाशाय वर्षणलाभाय च। अग्निर्हि देवानां होता, पुरोहितश्चाध्वराणाम्। यज्ञानाम् ऋत्विक् सः अग्निः सर्वथा वरणीयः। सर्वेषामेव देवानां कृपालाभायापि अर्चनीयश्चार्यैः।

ऋग्वेदस्य प्रथममण्डलस्य त्र्यधिकशततमसूक्ते विवृतः मघवता दासदमनवृत्तः। तत्र इन्द्रेण सह बहूनामेव इन्द्रपरिपन्थिनाम् समरःअतिघोरो वर्णितः। न केवलम् इन्द्रपरिपन्थिनः दस्यवः हताः अपि च तेषां निवासाश्च ध्वस्ताः वज्रिणा इन्द्रेण। अनार्याणां दस्यूनां वा नगराणां ध्वंससाधनं कृत्वा आर्याणामुन्नतिसाधनं हि इन्द्रस्य कीर्तिस्वरूपम्। ऋग्वेदस्य प्रथममण्डलस्य बहुषु सूक्तेषु दस्युनिधनाय पुनः पुनः प्ररोचितः आहूतश्च देवः पुरन्दरः। भूरिकर्मा जातुभर्मा स इन्द्रः सोमाभिषवकारिणाम् आर्याणाम् अभ्युदयविधानार्थमेव कृतसंकल्पोऽजायत। ऋग्वेदस्य प्रथममण्डले विद्यते कृष्णासुरवृत्तः। तत्र मनुः नाम इन्द्रपूजकस्य स्वार्थचरितार्थाय अव्रतं कृष्णं ध्वंसयामास बज्रवाहुः स पुरन्दरः।

पिप्रुशुष्णशम्बरादीनां दस्यूनां विनाशसाधनमेव इन्द्रमाहात्म्यहेतुभूतम्। यतः इन्द्रपूजकानाम् आर्याणां रिपुस्वरूपाः ते प्रकृत्या दुष्टाः इति पुनः पुनः घोषितं मुनिभिः। ऋग्वेदे ऋजिश्वान् नाम इन्द्रपूजकस्य आर्यनायकस्य पिप्रुः इति अनार्येण सह चिरविरोधो वर्णितः। पिप्रोः दृढबद्धाः पुराः इन्द्रेणैव विनष्टाः। मायाविनो दस्योः पिप्रोः बलहानिरेव तस्य महती कीर्तिरपरा। ऋजिश्वता निवेदितं पुरोडाशं भक्षयित्वा इन्द्रः पिप्रोः आवासं ध्वंसयामास। पिप्रोः पञ्चाशत्संख्यकाः कृष्णाङ्गाः प्रतिभटाः पुरन्देरेण प्रतिनिवृत्ताः युद्धे। तस्यानुषङ्गिनां पापाशयानां वर्चीमृगयशम्बरादीनां निधनायापि आहूतः शक्रदेवः अध्वर्यवैः।

दिवोदासशम्बरविवादोऽपि इन्द्रोपसकानुपासकयोर्विरोधस्य उदाहरणविशेषः एव। सोमप्रियः सः इन्द्रः हव्यप्रदायकाय भक्तप्रवराय दिवोदासाय शम्बरकृतेषु पुरशतेषु प्रस्तरनिर्मितं पुरमेकमयच्छत्।

पुरा तत्रासीत् दमीतिः नाम इन्द्रपूजकपुंगवः। दमीतेः प्रार्थनानुसारात् शक्रदेवः फेनपटलेन दभीतिरिपुं नमुचिं जघान। तयोः रणोऽतिघोरो भूमण्डलविदारकः अभवत्। वृत्रासुरसहायापरः इन्द्रस्य महाशत्रुः दुर्गवासी नमुचिः निहतो देवेन्द्रेण।ऋग्वेदस्य दशममण्डले दृश्यते धुनिचुमुरीकथा। न केवलं धुनिनिधनं अपि च चुमुरिनिधनञ्च दमीतिहिताय कृतमनुकम्पापरायणेन इन्द्रेण। दभीतिर्नाम नरपतेः मिनतिं निशम्य तयोराशुविनाशः कृतो भगवता बज्रवाहुना। पुनः भक्तप्रवराय दमीतये त्रिंशत्सहस्रदस्युहत्यापि तेनैव महाबलेन सम्पादिता हेलया। दभीतिः नाम इन्द्रपूजकस्य प्रीत्यर्थं इन्द्रस्येयं महती प्रचेष्टा। पुनः दभीतये दशशतदस्यून् इन्द्रः नष्टवान्, वृत्तान्तोऽयं दृश्यते द्वितीयमण्डलस्य त्रयोदशतमे सुक्ते यत् –

शतं वा यस्य दश साकामाद्य एकस्य श्रुष्टौ यद्ध चोदमाविथ।
अरज्जौ दस्युन्तसमुब्दभीतये सुप्राव्ये अभवः सास्युकथाः॥ ऋ.स. 2.13.9

न केवलं शुष्णपिप्रुचुमुरिधुनिशम्बरादीनां दस्युनाम दानवानां वा विनाशः कृतः इन्द्रेण। तेषां निवासाः अपि ध्वस्ताः रणनिपुणेन तेन मघवता। उच्यते यत् षष्ठमण्डले–

"स यो न मुहे न मिथू जनो भतसुमन्तुनामा चुमुरिं धुनिं च।
वृणक् पिप्रुं शम्बरं शुष्णमिन्द्रः पुरां च्यौत्नाय शयथाय नु चित्॥" 6.18.8

ऋग्वेदे नैसर्गिकदानवेषु पिशाचेषु वा प्रधान एव इंद्रशत्रुः वृत्रासुरः। जलदकल्पः प्राकृतिकदानव एव स। कृष्णदासकुलेषु प्रधानः स वृत्रः पुरन्देरेण प्रनष्टः। ऋग्वेदस्य दशममण्डलस्य एकस्मिन् मन्त्रे नववस्त्वो नाम दासविशेषेण सह तथा वृहद्रथ नाम दासापरेण सह वृत्रस्यापि विनाशः कृतः वृत्रघ्ना पुरन्दरेण। उक्तं यत्-

अहं स यो नववास्तवं वृहद्रथं सं वृत्रेव दासं वृत्रहारुजम्।
यद्वर्धयन्तं प्रथमयन्तमानुषग् दूरे पारे रजसो रोचनाकरम्॥ ऋ.स.10.49.6.

ऋग्वेदस्यान्यत्र मन्त्रान्तरेषु पुनः वहूनामेव वृत्राणां निधनवृत्तं दृष्ट्वा संशयो जायते यत् 'वृत्र' न केवलम् असुरविशेषो दासविशेषो वा परन्तु रिपुसमूहानां प्रतीकस्वरूपः एव। उच्यते यत् सप्तममण्डले-

त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्र हर्यश्व हन्सि।
त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दमीतये सुहन्तु॥ ऋ.स. 7.19.4

ऋग्वेदे वृत्रासुरस्य अतिलौकिकपरिचयोऽपि दृश्यते। त्वष्टामुनिः तस्य जनकः, जननी एव दानुः इति दानवी, सहोदरश्च बलः नाम असुरः।अकुतोभयः स इन्द्रः तं वज्रेन जघान। दृश्यते यत् तृतीयममण्डले –

सहदानुंपुरुहूतंक्षियन्तमहस्तमिन्द्रसंपिणक्कुणारुम्।
अभि वृत्रं वर्धमानं पियारुमपादबिन्द्र तवसा जघन्थ॥ ऋ.स. 3.30.8

प्रकृत्या तु वृत्रो जलदकल्पो दानवस्वरूपः। शुष्णपिप्रुशम्वरादयः अन्ये अतिक्रुराः पिशाचाः वृत्रस्य सहायकाःजलदकल्पाः प्राकृतिकदानवाः एवेति जल्पिताः। ते सर्वे खलु इन्द्रविरोधिनः इन्द्रेणावश्यमेव हन्तव्याः । वारिशूण्याः शुष्कमेघाः सर्वे जलदकल्पाः प्राकृतिकदानवाः एवेति कथिताः। 'दस्' इति धातुः उपक्षयार्थेऽपि प्रयुज्यते शब्दशास्त्रेषु। उपद्रवस्वरूपः प्राकृतिकदानवः दस्युः दासो वेति नामान्तरेणाभिधीयते। तेषां विनाशाय वज्रवाहुः पुरन्दरः पुनः पुनराहूतः ऋकसंहितायाम्। वज्रपाणिना इन्द्रेण सह नैसर्गिकदानवानां रणोऽतिघोरः प्रकृत्या तु शाश्वतिको वज्रमेघविरोधः एवेति वोध्यम्। मेघदानवान् हेलया पराभूय बहुजनहिताय जलवर्षणं हि इन्द्रस्य महत्त्वम्। विकृताङ्गो वर्षणप्रतिबन्धको वृत्रासुरः पर्वतरूपेणापि तटिनीजलधारागतिपथावरोधं कृतवान। तथाहि स 'नदीवृत्' इत्यनेनाभिधीयते। अतः धारासारान्तरायः तथा नदीगतिविघ्नः स वृत्रासुरो ध्वस्तः इन्द्रेण। अन्ये निरूदकाः मेघाश्च वृत्रसहायकाः। अतः आर्यत्राणाय तेषां विनाशोऽपि कृतो मघवता। तेषु दुष्टतरः वृत्रासुरांशभूतः अतिक्रुरः पिशाचवद् शुष्णो वारिशोषकः। ते सर्वेऽसुराः पुरवासिनः। क्षणिकास्तु तेषामालयाः 'शारदीपुरी' इति वर्णिताः सायनाचार्येण। उच्यते यत् – "शारदी सम्वत्सरसम्वन्धिनी सम्वत्सरपर्यन्ता प्राकारपरिखादिभिर्दृढीकृता'। इति। तेषां चलमानानां मेघपुराणां नाशेन हि प्राप्नोति इन्द्रः 'पुरन्दर' इत्यभिधा। ऋक्संहितायां मन्त्रान्तरेषु कुत्सो नाम इन्द्रभक्तेन सह शुष्णो नाम दासविशेषस्य चण्डसंग्रामो वर्ण्यते। कुत्सस्य महाशत्रुः स शुष्णः। पिप्रुसदृशः शुष्णोऽपि आसीत् पुरवासी। विजयलाभार्थम् इन्द्रकृपालाभतत्परेण कुत्सेन पुनः पुनः पूजितः पुरन्दरः। शुष्णसहायकाः अपराः कुयवादयो दासाः अपि इन्द्रेणैव हताः ध्वस्ताश्च तेषां निवासाः इत्यलं पल्लवितेन।

**सन्दर्भग्रन्थसूची**


1. विष्णुपुराणम् पञ्चाननतर्करत्नः नवभारतपावलिशार्स ७२ डि.महात्मा गान्धी रोड, कलिकाता ७००००१ द्वारा २०१८ ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।
2. पद्मपुराणम् पञ्चाननतर्करत्नः नवभारतपावलिशार्स ७२ डि महात्मा गान्धी रोड, कलिकाता ७००००१ द्वारा २०१८ ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।
3. ब्रह्मवैवर्तपुराणम् पञ्चाननतर्करत्नः नवभारतपावलिशार्स ७२ डि महात्मा गान्धी रोड, कलिकाता ७००००१ द्वारा २०१८ ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।

4. बृहद्धर्मपुराणम् पञ्चाननतर्करत्नः नवभारतपावलिशार्स ७२ डि महात्मा गान्धी रोड, कलिकाता ७००००१ द्वारा २०१८ ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।
5. संस्कृत साहित्येर इतिहास धीरेन्द्रनाथवन्द्योपाध्यायः पश्चिमबङ्गराज्यपुस्तकपर्षत्, ६ ए राजा सुबोधमल्लिकस्कोयार कलिकाता ७०००१३ द्वारा (१९९८) ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।
6. कौटिलीयम् अर्थशास्त्रम् मानवेन्दुवन्द्योपाध्यायः संस्कृतपुस्तकभाण्डार, ३८ (प्रथमखण्डम्) विधानसरणि कोलकाता ७००००६ द्वारा २०११ ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।
7. कौटिलीयम् अर्थशास्त्रम् मानवेन्दुवन्द्योपाध्यायः संस्कृतपुस्तकभाण्डार, ३८ (द्वितीयखण्डम्) विधानसरणि कोलकाता ७००००६ द्वारा २०११ ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।
8. ऊनविंशतिसंहिता पञ्चाननतर्करत्नः संस्कृतपुस्तकभाण्डार, ३८ विधानसरणि कोलकाता ७००००६ द्वारा २०११ ख्रीष्टाब्दे प्रकाशितम्, द्वितीयसंस्करणम्।
9. वेद (१) रमेशचन्द्रदत्तः हरफप्रकाशनी, ए १२६१२७ कलेजस्ट्रीटमार्केट द्वारा २०१५ ख्रीष्टाब्दे प्रकाशितम्।
10. वेद (१) रमेशचन्द्रदत्तः हरफप्रकाशनी, ए १२६१२७ कलेजस्ट्रीटमार्केट द्वारा २०१५ ख्रीष्टाब्दे प्रकाशितम्।